"केऽप्याविकं पथ्यतमं कदोष्णं क्षीरं त्वजानां श्रृतशीत माहुः। दोहान्तशीतं महिषीपयस्तं गव्यन्तु धारोष्णमिदं प्रशस्तम्। दृष्यं बृंहणमग्निवर्द्धनकरं पूर्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं कृच्छ्रस्य विच्छेदनम्। बाल्ये वह्निकरं ततो बलकरं वीर्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्वदा। क्षीरं सुहृर्त्तलितयोषितं यदतम्रमेतद्विकृतिं प्रयाति। तस्मात्तु दोषं कुरुते तदूर्द्ध्वं विषोपमं स्यादुषितो दशानाम्। जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम्। तदेव तरुणे पीतं विषवद्धन्ति मानुषम्"। क्षीरक्वाथगुणः। "चतुर्थभागं सलिलं निधाय यत्नाद् यदावर्त्तितमुत्तमं तत्। सर्वामयघ्नं बलपुष्टिकारि वीर्यप्रदं क्षीरमति प्रशस्तम्। गव्यं पूर्वाह्णकाले स्यादपराह्णे तु माहिषम्। क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्वदा। क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तञ्च नैतल्लवणेन सार्द्धम्। पिष्टान्नसन्धानकमाषमुद्गकोशातकीकन्दफलादिकैश्च"। तथा "मत्स्यमांसगुडमुद्गमूलकैः कुष्ठमावहति सेवितं पयः। शाकजाम्बवरसैश्च सेवितं मारयत्यनुघमाशु सर्पवत्। स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च। नित्यन्तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः। पुष्यन्ति धातवः सर्वे बलपुष्टिविवर्द्धनम्। क्षीरं गवाजकादेर्मधुरं क्षीरं नवप्रसूतानाम्। रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते। मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्। लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम्। गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्। मध्यमवयसां मुक्तमिदं दुर्बलन्तु वृद्धानाम्। तासां मासत्रयादूर्द्ध्वं गुर्विणीनाञ्च यत् पयः। तद्वाहि लवणं क्षीरं मधुरं पित्तशोषकृत्। दुग्धाम्लं शीतलं स्वादु दृष्यं वर्णकरं गुरु। वातपित्तापहं रुच्यं बृंहणं बलवर्द्धनम्" राजनि०।

**दुग्धतालीय** न० दुग्धस्य तालाय प्रतिष्ठायै हितं छ। १दुग्धाग्रे २क्षीरफेने च मेदि०।

**दुग्धपाचन** न० दुग्धं पाच्यतेऽनेन पाचि—करणे ल्युट्। दुग्धपाकपात्रे हारा०।

**दुग्धपाषाण** पु० दुग्धं निर्यासः पाषाण इव यस्य। (शिरगोला) ख्याते वृक्षभेदे राजनि०। स्वार्थे क। अत्रैवार्थे।

**दुग्धपुष्पी** स्त्री दुग्धमिव शुभ्रं पुष्पं मञ्जरी यस्याः गौरा० ङीष्। (दुधपेया) ख्याते १वृक्षभेदे २सेवकालौ शब्दच०।

**दुग्धफेन** पु०दुग्धस्य फेनो यत्र। शर्करासहिते क्षीरहिण्डीरे राजनि०। गौरा० ङीष्। दुग्धफेनी क्षुपभेदे स्त्री। स्वार्थे क तत्रार्थे पु०

**दुग्धबन्ध** पु०दुग्धार्थं बन्धः। दुग्धदोहनार्थं गोर्बन्धे "पीतदुग्धा तु धेनुर्या संस्थिता दुग्धबन्धकैः" हेमच०।

**दुग्धबीजा** स्त्री दुग्धमिव बीजं शस्यबीजं यत्र। यावनालाद्यतण्डुलचिपिटे राजनि०।

**दुग्धसमुद्र** पु०६त०। दुग्धोदके क्षीरसमुद्रे त्रिका०। दुग्धसिन्धुप्रभृतयोऽप्यत्र। "लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतममृतरश्मिं श्रीश्च यस्मात् बभूव" सि०शि०

**दुग्धाङ्क** पु० दुग्धमिव शुभ्राऽङ्कः चिह्नभेदोऽस्य। उपलभेदे शब्दार्थक०। [वृक्षे राजनि०।

**दुग्धाश्मन्** पु० दुग्धं निर्यासः अश्मा इव। दुग्धपाषाण-

**दुग्धाम्र** न० दुग्धपक्वमाम्रम्। दुग्धतालीये राजनि०।

**दुग्धिका** स्त्री दुग्धं क्षीरमिव निर्यासोऽस्त्यस्याः ठन्। (दुधि (क्षीरा) इति ख्याते वृक्षभेदे। "दुग्धिकोष्णा गुरू रूक्षा वातला पुत्रदायिनी। स्वादुक्षीरा कटुस्तिक्ता सृष्टमलमला पटुः। ग्राही विष्टम्भिनी हृद्या कफकुष्ठक्रिमिप्रणुत्" भावप्र०। २गन्धिका इति प्रसिद्धायामुत्तमफलिन्याम् युग्मफलायाम् रत्नमा०।

**दुग्धिनिका** स्त्री दुग्धमस्त्यस्य इनि दुग्धिनि निर्यासे कायति कै—क अलुक्स०। रक्तापामार्गे राजनि०।

**दुग्धी** स्त्री दुग्धमिव निर्यासोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष्। १दुग्धिकायाम् (दुधि) १क्षीरावीलतायां मेदि०। २दुग्धपाषाणे राजनि०।

**दुघ** त्रि० दोग्धि—दुह—क हस्य घः। दोहनकर्त्तरि "कामदुघा गौः" सि०कौ०। अस्य कस्मिंश्चिदुपपदे एव साधुत्वं नान्यथा। "कामदुघाङ्घ्रिपद्म" भाग० ३।२१।१५

**दुच्छक** पु० दु—सन्तापे सम्प० भावे क्विप् तस्मै उपतापाय तन्निवृत्तये शक्नोति शक—अच्। सुरानामगन्धद्रव्ये विहाराद्यवकाशके च मेदि०।

**दुच्छुन्** पु० दुष्टःश्वा प्रा०स० पृषो०। दुष्टकुक्कुरे "आरेबाधस्व दुच्छुनाम्" यजु०१६।२८ "दुष्टाश्च ते श्वानश्च तेषाम्" वेददी०।

**दुच्छून** त्रि०दुष्ट उच्छूनः प्रा०स०। पृषो०। दुष्टे उच्छूने ततः भृशा०क्यङ्। दुच्छुनायते बाधते इत्यर्थः। "किमस्मान् दुच्छुनायसे" ऋ०७।५५।२ 'दुच्छुनायसे बाधसे" भा०।

**दुडि** स्त्री दुलि+लस्य डः। दुल्याम् रायमुकुटः।